A ray of light 32.

1 2 3 4 5 3 7 8
रोचिः शोचिरभीशुः प्रद्योतगभस्तिरश्मिघृणिकिरणाः ।
9 10 11 12 13 14 15 16 17
रुचिरुग्दीधितिदीप्तिद्युतिप्रभाभाविभाभासः ॥ ३८ ॥
18 19 20 21 22 23 24 a 25 26
उस्रधामवसुकेतुमरीचिप्रग्रहोपधृतिवृष्णिमयूखाः ।
27 28 29 30 31 32
अंशुभानुकरपादविरोका गाव इत्यभिहितास्तु समानाः ॥ ३९ ॥

Fiery hot 7.

1 2 3 4 5 6 7 b
तिग्मं तीक्ष्णं खरं तीव्रं चण्डमुष्णं पटु स्मृतम् ।

Heat of the sun 4.

1 2 3 4
आतपः कथ्यते रौद्रं निदाघो घर्म उच्यते ॥ ४० ॥

The halo round the sun or the moon.

1 2 3 4
परिधिः परिवेषः स्यान्मण्डलं चोपसूर्यकम् ।

An eclipse 3.

1 2 3
उच्यते राहुसंस्पर्श उपराग उपप्लवः ॥ ४१ ॥

The moon 21.

1 2 3 4
इन्दुश्चन्द्रश्चन्द्रमा ओषधीशः ,
5 3 7 8
सोमो राजा रोहिणीवल्लभोऽब्जः ।
9 10
ऋक्षेशः स्यादत्रिनेत्रप्रसूतः ,
11 12 13
प्रालेयांशुः श्वेतरोचिः शशाङ्कः ॥ ४२ ॥
14 c 15 16 17
द्विजराजो रजनिकरः पीयूषरुचिर्निशीथिनीनाथः ।
d 18 19 20 21
जैवातृको मृगाङ्को विधुश्च दाक्षायणीरमणः ॥ ४३ ॥

Moonlight 4.

1 2 3 e 4
चन्द्रिका कौमुदी ज्योत्स्ना तथा चन्द्रातपः स्मृतः ।

The disc round the sun or moon (see परिधि in 41 sloka).

1 2 f 1
मण्डलं बिम्बमाख्यातं हृदये लाञ्छनं मृगः ॥ ४४ ॥

The spots on the moon represented as a hare.

Mark, token, symbol 7.

1 2 3 4 5 6
अङ्कश्चिह्नमभिज्ञानं लाञ्छनं लक्ष्म लक्षणम् ।
7
कलङ्कश्चेति विज्ञेया नातिनानार्थवाचकाः ॥ ४५ ॥

The planet mars 5.

1 2 3 4 5
वक्रमङ्गारकं भौमं लोहिताङ्गं धरात्मजम् ।

The planet Mercury.

1 2 3 4 g
रौहिणेयं बुधं सौम्यमाहुश्चान्द्रमसायनम् ॥ ४६ ॥

a धिष्ण्य, घृष्णि b तपः स्मृतम् c रजनिचरः d जोकात्रिको e चन्द्रतपः
f हृदयं g सायनिः ।